## न यदि । (११३/२७७४)

यच्छब्दसहिते अभिज्ञावचन उपपदे लृट् [1]प्रत्ययो न भवति । पूर्वेण [2]प्राप्तः प्रतिषिध्यते । अभिजानासि देवदत्त यत् [3]कश्मीरेष्ववसाम । वासमात्रं[4] स्मर्यते, न तु अपरं किंचिल्लक्ष्यते । [5]तेन उत्तरसूत्रस्य नायं विषयः[6] ॥

## विभाषा साकाङ्क्षे । (११४/२७७८)

यदि इति [7]नानुवर्तते । उभयत्रविभाषेयम् । अभिज्ञावचने उपपदे यच्छब्दसहिते केवले च विभाषा लृट् प्रत्ययो भवति, साकाङक्षश्चेत् प्रयोक्ता । लक्ष्यलक्षणयोः सम्बन्धे प्रयोक्तुराकाङक्षा भवति[8] । अभिजानासि देवदत्त कश्मीरेषु[9] वत्स्यामस्तत्रौदनं भोक्ष्यामहे । अभिजानासि देवदत्त मगधेषु वत्स्यामः, तत्रौदनं [10]भोक्ष्यामहे । यदि खल्वपि – अभिजानासि देवदत्त यत् कश्मीरेषु वत्स्यामः, [11]यत्तत्रौदनं भोक्ष्यामहे । अभिजानासि देवदत्त यत् कश्मीरेष्ववसाम, [12]यत्तत्रौदनमभुञ्ज्महि । वासो लक्षणं, भोजनं [13]लक्ष्यम् ॥

## परोक्षे लिट् । (११५/२१७१)

[14]भूतानद्यतने इति [15]वर्तते । तस्य विशेषणं परोक्षग्रहणम् । भूतानद्यतनपरोक्षेऽर्थे वर्तमानाद् धातोः लिट् प्रत्ययो भवति । ननु[16] धात्वर्थः सर्वः परोक्ष एव ? सत्यमेतत् । अस्ति तु लोके [17]धात्वर्थेनापि कारकेषु प्रत्यक्षाभिमानः । स यत्र नास्ति तत् परोक्षम् इत्युच्यते । चकार । जहार । [18]उत्तमविषयेऽपि चित्तव्याक्षेपात् परोक्षता [19]सम्भवत्येव । तद् यथा–सुप्तोऽहं किल विललाप (म.भा.२.१२०) ।

[२७१] [20]अत्यन्तापह्नवे च लिड् वक्तव्यः (म.भा. २. १२०) ।

कलिङ्गेषु स्थितोऽसि ? नाहं कलिङ्गाञ् जगाम । [21]दक्षिणापथं प्रविष्टोऽसि ? नाहं दक्षिणापथं प्रविवेश ॥

## हशश्वतोर्लङ् च । (११६/२७७६)

भूतानद्यतनपरोक्षेऽर्थे[22] लिटि प्राप्ते हशश्वतोः उपपदयोः लङ प्रत्ययो भवति, चकाराल् लिट् च । इति ह अकरोत्, इति ह चकार । शश्वदकरोत्, शश्वच् चकार ॥

---

1. प्रत्ययो नास्ति फ. 2. प्राप्तः नास्ति फ. 3. मगधेषु ब. क. ड. 4. तत्र इत्यधिकम् ब. क. ड. 5. वाक्यमिदं नास्ति ब. ग. फ. 6. इति इत्यधिकम् ड. 7. च इत्यधिकम् क. 8. चेत् इत्यधिकम् अ. 9. च इत्यधिकम् ब. 10. अभुञ्ज्महि क.फ. 11. यत् नास्ति फ. 12. यत् नास्ति फ. 13. लक्ष्ये ब. 14. भूतेऽनद्यतने ब 15. च इत्यधिकम् ब. 16. च इत्यधिकम् ब. ड. फ. 17. तत्रापि ब. ड. फ. 18. उन्मत्तविषये अ. क. 19. भवत्येव क. 20. अपि अत्यन्तापह्नवेऽपि ड. 21. दक्षिणापथे किंचिदतिष्ठं कृतवान् नाहं दक्षिणापथं प्रविवेश अ. क. ड, उदाहरणमिदं नास्ति ब. 22 वर्तमानात् धातोः इत्यधिकम् फ, अर्थे नास्ति अ. ब. क.